MSS No. 26 Subject Language

Name of MSS Astādhyayi (अष्टाध्यायी)

Author Panini (पाणिनि)

Period — — Folios 24 (00a+00b, 002a to 009a +1 to 17)

Script Sanskrit Source Prithipal Singh

Missing Folios Irregular Pages

4 S 5

A no. 26

[illegible]

Sanskrit

ASTADHYAYI

(१८)

(Chiefest pages)

४।११९ ६।२।४५

455
A799
(MS. No: 26)

ॐ नमो गणेशाय नमः॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः १
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः २ अइउण् १ ऋ
ऌक् २ एओङ् ३ ऐऔच् ४ हयवरट् ५ लण् ६ ञमङणनम् ७ झभञ् ८ घढधष् ९ जबगडदश् १० खफछ
ठथचटतव् ११ कपय् १२ शषसर् १३ हल् १४ वृद्धिरादैच् १५ अदेङ्गुणः १६ इको गुणवृद्धी १७ न धातुलोप आर्द्ध
धातुके १८ क्ङिति च १९ दीधीवेवीटाम् २० हलोऽनन्तराः संयोगः २१ मुखनासिकावचनोऽनुनासिकः २२ तुल्या
स्यप्रयत्नं सवर्णम् २३ नाज्झलौ २४ ईदूदेद्द्विवचनं प्रगृह्यम् २५ अदसो मात् २६ शे २७ निपात एकाजनाङ् २८
ओत् २९ संबुद्धौ शाकल्यस्येतावनार्षे ३० उञः ३१ ऊँ ३२ ईदूतौ च सप्तम्यर्थे ३३ दाधा घ्वदाप् ३४ आद्यन्तव
देकस्मिन् ३५ तरप्तमपौ घः ३६ बहुगणवतुडति संख्या ३७ ष्णान्ता षट् ३८ डति च ३९ क्तक्तवतू निष्ठा ४० सर्वादी
नि सर्वनामानि ४१ विभाषा दिक्समासे बहुव्रीहौ ४२ न बहुव्रीहौ ४३ तृतीयासमासे ४४ द्वन्द्वे च ४५ विभाषा जसि

स॰ सा॰ येनविधिस्तदंतस्य ७२ वृद्धिर्यस्याचामादिस्तद्वृद्धं ७३ त्यदादीनि च ७४ एङ्प्राचांदेशे ७५ वृद्धिरा यन्न वदद्ययीमा
वद्ध॰ लुकं ... दृष्टा॥ इति प्रथमाध्यायस्य प्रथमः पादः॥ गांकुटादिभ्योञ्णिन्ङित् १ विज इट् २ विभाषोर्णोः ३ भा
सार्वधातुकमपित् ४ असंयोगाल्लिट् कित् ५ इन्धिभवतिभ्यां च ६ मृडमृदगुधकुषक्लिशवदवसः क्त्वा ७ रुद
विदमुषग्रहिस्वपिप्रच्छः संश्च ८ इको झल् ९ हलन्ताच्च १० लिङ्सिचावात्मनेपदेषु ११ उश्च १२ वा गमः १३ हन
नः सिच् १४ यमो गंधने १५ विभाषोपयमने १६ स्थाघ्वोरिच्च १७ न क्त्वा सेट् १८ निष्ठा शीङ्स्विदिमिदिक्ष्विदि
धृ... मृषस्तितिक्षायाम् २० उदुपधाद्भावादिकर्मणोरन्यतरस्याम् २१ पूङः क्त्वा च २२ नोपधात्थ
फान्ताद्वा २३ वंचिलुंच्यृतश्च २४ तृषिमृषिकृशेः काश्यपस्य २५ रलो व्युपधाद्धलादेः संश्च २६ ऊकालोज्झ्र
स्वदीर्घप्लुतः २७ अचश्च २८ उच्चैरुदात्तः २९ नीचैरनुदात्तः ३० समाहारः स्वरितः ३१ तस्यादित उदात्तमर्द्धह्र
स्वम् ३२ एकश्रुति दूरात्संबुद्धौ ३३ यज्ञकर्मण्यजपन्यूंखसामसु ३४ उच्चैस्तरां वा वषट्कारः ३५

राम

प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च ३३ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ३४ स्वमज्ञा
तिधनाख्यायाम् ३५ अन्तरं बहिर्योगोपसंव्यानयोः ३६ स्वरादिनिपातमव्ययम् ३७ तद्धितश्चासर्वविभक्तिः ३८
कृन्मेजन्तः ३९ क्त्वातोसुन्कसुनः ४० अव्ययीभावश्च ४१ शि सर्वनामस्थानम् ४२ सुडनपुंसकस्य ४३ न वेति
विभाषा ४४ इग्यणः संप्रसारणम् ४५ आद्यन्तौ टकितौ ४६ मिदचोन्त्यात्परः ४७ एच इग्घ्रस्वादेशे ४८ षष्ठी स्था
नेयोगा ४९ स्थानेन्तरतमः ५० उरण्रपरः ५१ अलोन्त्यस्य ५२ ङिच्च ५३ आदेः परस्य ५४ अनेकाल्शित्सर्वस्य ५५
स्थानिवदादेशोनल्विधौ ५६ अचः परस्मिन्पूर्वविधौ ५७ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदी
र्घजश्चर्विधिषु ५८ द्विर्वचनेचि ५९ अदर्शनं लोपः ६० प्रत्ययस्य लुक्श्लुलुपः ६१ प्रत्ययलोपे प्रत्ययलक्षण
म् ६२ न लुमताङ्गस्य ६३ अचोन्त्यादि टि ६४ अलोन्त्यात्पूर्व उपधा ६५ तस्मिन्निति निर्दिष्टे पूर्वस्य ६६
तस्मादित्युत्तरस्य ६७ स्वं रूपं शब्दस्याशब्दसंज्ञा ६८ अणुदित्सवर्णस्य चाप्रत्ययः ६९ आदिरन्त्येन सहेता ७०

भूवादयो धातवः १ उपदेशेऽजनुनासिक इत् २ हलन्त्यम् ३ न विभक्तौ तुस्माः ४ आदिर्ञिटुडवः ५ षः प्रत्ययस्य ६ चुटू ७ लश
क्वतद्धिते ८ तस्य लोपः ९ यथासंख्यमनुदेशः समानाम् १० स्वरितेनाधिकारः ११ अनुदात्तङित आत्मनेपदम् १२
भावकर्मणोः १३ कर्तरि कर्मव्यतिहारे १४ न गतिहिंसार्थेभ्यः १५ इतरेतरान्योन्योपपदाच्च १६ नेर्विशः १७ प
रिव्यवेभ्यः क्रियः १८ विपराभ्यां जेः १९ आङो दोऽनास्यविहरणे २० क्रीडोऽनुसंपरिभ्यश्च २१ समवप्रविभ्यः स्थः २२
प्रकाशनस्थेयाख्ययोश्च २३ उदोऽनूर्ध्वकर्मणि २४ उपान्मन्त्रकरणे २५ अकर्मकाच्च २६ उद्विभ्यां तपः २७ आ
ङो यमहनः २८ समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः २९ निसमुपविभ्यो ह्वः ३० स्पर्द्धायामाङः ३१ गन्धनावक्षेपण
सेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः ३२ अधेः प्रसहने ३३ वेः शब्दकर्मणः ३४ अकर्मकाच्च ३५
संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः ३६ कर्तृस्थे चाशरीरे कर्मणि ३७ वृत्तिस
र्गतायनेषु क्रमः ३८ उपपराभ्याम् ३९ आङ उद्गमने ४० वेः पादविहरणे ४१ प्रोपाभ्यां समर्थाभ्याम् ४२ ३ राम

३

विभाषा छन्दसि ३५ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ३६ देवब्रह्मणोरनुदात्तः ३७ स्वरितात्संहितायामनुदात्तानाम् ३८ उदात्तस्व
रितपरस्य सन्नतरः ३९ प्रथमानिर्दिष्टं समास उपसर्जनम् ४० एकविभक्ति चापूर्वनिपाते ४१ अर्थवदधातुरप्रत्ययः प्राति
पदिकम् ४२ कृत्तद्धितसमासाश्च ४३ ह्रस्वो नपुंसके प्रातिपदिकस्य ४४ गोस्त्रियोरुपसर्जनस्य ४५ लुक् तद्धितलुकि ४६
इद्गोण्याः ४७ लुपि युक्तवद्व्यक्तिवचने ४८ विशेषणानां चाजातेः ४९ तदशिष्यं संज्ञाप्रमाणत्वात् ५० प्रधानप्रत्य लुब्योगा
यार्थवचनमर्थस्यान्यप्रमाणत्वात् ५१ योगप्रमाणे च तदभावेऽदर्शनं स्यात् ५२ कालोपसर्जने च तुल्यम् ५३ जात्या प्रख्यानात् ५४
ख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ५८ अस्मदो द्वयोश्च ५९ फल्गुनीप्रोष्ठपदानां च नक्षत्रे ६० छन्दसि पुनर्व
स्वोरेकवचनम् ६१ विशाखयोश्च ६२ तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ६३ सरूपाणामेकशेष ए
कविभक्तौ ६४ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ६५ स्त्री पुंवच्च ६६ पुमान् स्त्रिया ६७ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ६८
नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ६९ पिता मात्रा ७० श्वशुरः श्वश्र्वा ७१ त्यदादीनि सर्वैर्नित्यम् ७२ ग्रा
म्यपशुसंघेष्वतरुणेषु स्त्री ७३ कृदायुडपधादय कृ ह्न दसि पु त सो चलोपाए ॥ इति प्रथमाध्यायस्य द्वितीयः पादः

८

मु॰ पा॰ [illegible] ...भ्यः क्षिपः ॥७९॥ प्राद्वहः ॥८०॥ परेर्मृषः ॥८१॥ व्याङ्परिभ्यो रमः ॥८२॥ उपाच्च ॥८३॥ विभा
षाकर्मकात् ॥८४॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥८५॥ निगरणचलनार्थेभ्यश्च ॥८६॥ अणावकर्मकाच्चि
त्तवत्कर्तृकात् ॥८७॥ न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥८८॥ वा क्यषः ॥८९॥ द्युद्भ्यो लुङि ॥९०॥ वृद्भ्यः स्यस
नोः ॥९१॥ लुटि च कॢपः ॥९२॥ भू वादयः क्रीडोऽनु [illegible] यते ॥ प्राद्वहः स्थ्यो दश ॥ इति प्रथमाध्यायस्य तृतीयः पादः ॥
आकडारादेका संज्ञा ॥१॥ विप्रतिषेधे परं कार्यम् ॥२॥ यू स्त्र्याख्यौ नदी ॥३॥ नेयङुवङ्स्थानावस्त्री ॥४॥ वामि ॥५॥
ङिति ह्रस्वश्च ॥६॥ शेषो घ्यसखि ॥७॥ पतिः समास एव ॥८॥ षष्ठीयुक्तश्छन्दसि वा ॥९॥ ह्रस्वं लघु ॥१०॥ संयोगे गुरु ॥११॥
दीर्घं च ॥१२॥ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥१३॥ सुप्तिङन्तं पदम् ॥१४॥ नः क्ये ॥१५॥ सिति च ॥१६॥ स्वादिष्वसर्व
नामस्थाने ॥१७॥ यचि भम् ॥१८॥ तसौ मत्वर्थे ॥१९॥ अयस्मयादीनि छन्दसि ॥२०॥ बहुगुण [illegible] संख्या ॥ क्ताकपो

राम
८

नुपसर्गाद्वा ४३ अपह्नवे ज्ञः ४४ अकर्मकाच्च ४५ संप्रतिभ्यामनाध्याने ४६ भासनोपसंभाषाज्ञानयत्नविमत्युपमं
त्रणेषु वदः ४७ व्यक्तवाचां समुच्चारणे ४८ अनोरकर्मकात् ४९ विभाषा विप्रलापे ५० अवाद्ग्रः ५१ समः प्रतिज्ञा
ने ५२ उदश्चरः सकर्मकात् ५३ समस्तृतीयायुक्तात् ५४ दाणश्च सा चेच्चतुर्थ्यर्थे ५५ उपाद्यमः स्वकरणे ५६ ज्ञाश्रु
स्मृदृशां सनः ५७ नानोर्ज्ञः ५८ प्रत्याङ्भ्यां श्रुवः ५९ शदेः शितः ६० म्रियतेर्लुङ्लिङोश्च ६१ पूर्ववत्सनः ६२ आम्प्र
त्ययवत्कृञोऽनुप्रयोगस्य ६३ प्रोपाभ्यां युजेरयज्ञपात्रेषु ६४ समः क्ष्णुवः ६५ भुजोऽनवने ६६ णेरणौ यत्कर्म
णौ चेत्स कर्ताऽनाध्याने ६७ भीस्म्योर्हेतुभये ६८ गृधिवञ्च्योः प्रलम्भने ६९ लियः सम्माननशालिनी
करणयोश्च ७० मिथ्योपपदात्कृञोऽभ्यासे ७१ स्वरितञितः कर्त्रभिप्राये क्रियाफले ७२ अपाद्वदः ७३ णि
चश्च ७४ समुदाङ्भ्यो यमोऽग्रन्थे ७५ अनुपसर्गाज्ज्ञः ७६ विभाषोपपदेन प्रतीयमाने ७७ शेषात्कर्तरि परस्मैपदम् ७८

[illegible] तरस्याम् ५३ स्वतंत्रः कर्त्ता ५४ तत्प्रयोजको हेतुश्च ५५ प्राग्रीश्वरान्निपाताः ५६ चादयोऽसत्वे ५७ प्रादयः ५८ उ
पसर्गाः क्रियायोगे ५९ गतिश्च ६० ऊर्यादिच्विडाचश्च ६१ अनुकरणञ्चानितिपरं ६२ आदरानादरयोः स
दसती ६३ भूषणेऽलम् ६४ अन्तरपरिग्रहे ६५ कणेमनसी श्रद्धाप्रतिघाते ६६ पुरोऽव्ययम् ६७ अस्तञ्च ६८
अच्छ गत्यर्थवदेषु ६९ अदोऽनुपदेशे ७० तिरोऽन्तर्द्धौ ७१ विभाषा कृञि ७२ उपाजेऽन्वाजे ७३ साक्षात्प्रभृतीनि च ७४
अनत्याधान उरसिमनसी ७५ मध्येपदे निवचने च ७६ नित्यं हस्ते पाणावुपयमने ७७ प्राध्वं बन्धने ७८ जी
विकोपनिषदावौपम्ये ७९ ते प्राग्धातोः ८० छन्दसि परेऽपि ८१ व्यवहिताश्च ८२ कर्मप्रवचनीयाः ८३ अनुर्ल
क्षणे ८४ तृतीयार्थे ८५ हीने ८६ उपोऽधिके च ८७ अपपरी वर्जने ८८ लक्षणेत्थम्भूताख्यानभागवीप्सासु प्र
तिपर्यनवः ८९ अभिरभागे ९० प्रतिः प्रतिनिधिप्रतिदानयोः ९१ अधिपरी अनर्थकौ ९२ स[illegible]जायाम् ९३

राम

दिवश्चैकवच्चनेरकारकेः २३ ध्रुवमपायेपादानम् २४ भीत्रार्थानां भयहेतुः २५ पराजेर[illegible]ः [illegible] वारणार्थानामी
प्सितः २७ अन्तर्द्धौ येनादर्शनमिच्छति २८ आख्यातोपयोगे २९ जनिकर्त्तुः प्रकृतिः ३० भुवः प्रभवः ३१
कर्मणा य[illegible]मि[illegible] स सम्प्रदानम् ३२ रुच्यर्थानां प्रीयमाणः ३३ श्लाघ[illegible]स्थाशपां ज्ञीप्स्य[illegible] ३४
धारेरु[illegible] स्पृहेरीप्सितः ३६ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ३७ क्रुधद्रुहोरुपसृष्टयोः
कर्म ३८ [illegible]धीक्ष्योर्यस्य विप्रश्नः ३९ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता ४० अनुप्रतिगृणश्च ४१ साधकत
मं कर[illegible] ४२ दिवः कर्म च ४३ परिक्रियणे सम्प्रदानमन्यतरस्याम् ४४ आधारोधिकरणम् ४५ अधि
[illegible]सां कर्म ४६ अभिनिविशश्च ४७ उपान्वध्याङ्वसः ४८ कर्त्तुरीप्सिततमं कर्म ४९ तथायुक्तं चानी
[illegible] ५० अकथितञ्च ५१ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ ५२ हृक्रोरन्य

६

श्री ध्या. नेषु ६ यथासादृश्ये ७ यावदवधारणे ८ सुप्प्रतिना मात्रार्थे ९ अक्षशलाकासंख्याः परिणा १० विभाषा ११
अपपरिबहिरंचवः पंचम्या १२ आङ्मर्यादाभिविध्योः १३ लक्षणेनाभिप्रती आभिमुख्ये १४ अनुर्यत्स-
मया १५ यस्य चायामः १६ पारेमध्ये षष्ठ्या वा १७ संख्या वंश्येन १८ नदीभिश्च १९ अन्यपदार्थे च सं-
ज्ञायाम् २० तत्पुरुषः २१ द्विगुश्च २२ द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २३ स्वयं क्तेन २४
खट्वा क्षेपे २५ सामि २६ कालाः २७ अत्यंतसंयोगे च २८ तृतीया तत्कृतार्थेन गुणवचनेन २९ पूर्वस-
दृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ३० कर्तृकरणे कृता बहुलम् ३१ कृत्यैरधिकार्थव-
चने ३२ अन्नेन व्यंजनम् ३३ भक्ष्येण मिश्रीकरणम् ३४ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ३५
पंचमी भयेन ३६ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ३७ स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ३८

स्मः
६

अतिरतिक्रमणे च ९५ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ९६ अधिरीश्वरे ९७ विभाषा कृञि ९८ उ
पाजेन्वाजे लः परस्मैपदम् ९९ तङानावात्मनेपदम् १०० तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १०१
तान्येकवचनद्विवचनबहुवचनान्येकशः २ सुपः ३ विभक्तिश्च ४ युस्मद्युपपदे समानाधिकरणे
स्थानिन्यपि मध्यमः ५ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ६ अस्मद्युत्तमः ७ शेषे प्रथमः ८ परः
सन्निकर्षः संहिता ९ विरामोऽवसानम् १० आकडाद्धु प्रतिगरणा उयौदिहु नू सितिङ्डो दपा ॥
इति प्रथमाध्यायस्य चतुर्थः पादः ॥ इति प्रथमोऽध्यायः ॥ समर्थः पदविधिः १ सुबामंत्रिते पराङ्गव
त्स्वरे २ प्राक्कडारात्समासः ३ सह सुपा ४ अव्ययीभावः ५ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्था
भावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवच

अ० व्या० लितवलिनजरतीभिः ६७ कृत्यतुल्याख्या अजात्या ६८ वर्णो वर्णेन ६९ कुमारः श्रमणादिभिः ७० चतुष्पादो गर्भि-
ण्या ७१ मयूरव्यंसकादयश्च ७२ समर्थोन्यपदार्थे सिद्धशुष्कसन्नद्धादयः इति द्वितीयाध्यायस्य प्रथमः पादः ॥
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे १ अर्द्धं नपुंसकं २ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् ३
प्राप्तापन्ने च द्वितीयया ४ कालाः परिमाणिना ५ नञ् ६ ईषदकृता षष्ठी ७ याजकादिभिश्च ८ न निर्द्धारणे ९ पूरण-
गुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन १० क्तेन च पूजायाम् ११ अधिकरणवाचिना च १२ कर्मणि गा
च १३ तृजकाभ्यां कर्तरि १४ कर्तरि च १५ नित्यं क्रीडाजीविकयोः १६ कुगतिप्रादयः १७ उपपदमतिङ् १८ अमैवा-
व्ययेन १९ तृतीयाप्रभृतीन्यन्यतरस्याम् २० क्त्वा च २१ शेषो बहुव्रीहिः २२ अनेकमन्यपदार्थे २३ संख्ययाव्ययास-
न्नादूराधिकसंख्याः संख्येये २४ दिङ्नामान्यन्तराले २५ तत्र तेनेदमिति सरूपे २६ तेन सहेति तुल्ययोगे २७

राम

सप्तमी शौण्डैः ४० सिद्धशुष्कपक्वबन्धैश्च ४१ ध्वाङ्क्षेण क्षेपे ४२ कृत्यैर्ऋणे ४३ संज्ञायाम् ४४ क्तेनाहोरात्रावयवाः ४५
तत्र ४६ क्षेपे ४७ पात्रेसमितादयश्च ४८ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन ४९ दिक्संख्ये
संज्ञायाम् ५० तद्धितार्थोत्तरपदसमाहारे च ५१ संख्यापूर्वो द्विगुः ५२ कुत्सितानि कुत्सनैः ५३ पापाणके
कुत्सितैः ५४ उपमानानि सामान्यवचनैः ५५ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ५६ विशेषणं
विशेष्येण बहुलम् ५७ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ५८ श्रेण्यादयः कृता
दिभिः ५९ क्तेन नञ्विशिष्टेनानञ् ६० सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ६१ वृन्दारकनागकुञ्ज
रैः पूज्यमानम् ६२ कतरकतमौ जातिपरिप्रश्ने ६३ किं क्षेपे ६४ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशा क
वेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ६५ प्रशंसावचनैश्च ६६ युवा खलतिपलित॥

ष० का०

हेतुप्रयोगे २६ सर्वनाम्नस्तृतीया च २७ अपादाने पंचमी २८ अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते २९
षष्ठ्यतसर्थप्रत्ययेन ३० एनपा द्वितीया ३१ पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ३२ करणे च स्तोकाल्प
कृच्छ्रकतिपयस्यासत्ववचनस्य ३३ दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ३४ दूरान्तिकार्थेभ्यो द्वितीया च ३५ स
प्तम्यधिकरणे च ३६ यस्य च भावेन भावलक्षणम् ३७ षष्ठी चानादरे ३८ स्वामीश्वराधिपतिदायादसाक्षि
प्रतिभूप्रसूतैश्च ३९ आयुक्तकुशलाभ्यां चासेवायाम् ४० यतश्च निर्द्धारणं ४१ पंचमीविभक्ते ४२ साधुनिपुणाभ्या
मर्चायां सप्तम्यप्रतेः ४३ प्रसितोत्सुकाभ्यां तृतीया च ४४ नक्षत्रे च लुपि ४५ प्रातिपदिकार्थलिंगपरिमाणवच
नमात्रे प्रथमा ४६ सम्बोधने च ४७ सामन्त्रितं ४८ एकवचनं संबुद्धिः ४९ षष्ठी शेषे ५० ज्ञोविदर्थस्य करणे ५१
अधीगर्थदयेशां कर्मणि ५२ कृञः प्रतियत्ने ५३ रुजार्थानां भाववचनानां ५४ आशिषि नाथः ५५ जासिनि
प्रहणनाटक्राथपिषां हिंसायाम् ५६ व्यवहृपणोः समर्थयोः ५७ दिवस्तदर्थस्य ५८ विभाषोपसर्गे ५९ द्वितीया

राम

८

चार्थेद्वन्द्वः २९ उपसर्जनंपूर्वम् ३० राजदन्तादिषुपरम् ३१ द्वन्द्वेघि ३२ अजाद्यदन्तम् ३३ सप्तमीविशेषणेबहुव्री
हौ ३४ निष्ठा ३५ वाहिताग्न्यादिषु ३६ कडाराःकर्मधारये ३७ पूर्वापराधरोत्तरं तृतीयाप्रभृतीन्यष्टादश ॥ इति
द्वितीयाध्यायस्यद्वितीयःपादः ॥ अनभिहिते १ कर्मणिद्वितीया २ तृतीयाचहोश्छन्दसि ३ अन्तरा
न्तरेणयुक्ते ४ कालाध्वनोरत्यन्तसंयोगे ५ अपवर्गेतृतीया ६ सप्तमीपञ्चम्यौकारकमध्ये ७ कर्मप्रवचनी
ययुक्तेद्वितीया ८ यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्तमी ९ पञ्चम्यपाङ्परिभिः १० प्रतिनिधिप्रतिदानेच ।
यस्मात् ११ गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनि १२ चतुर्थीसम्प्रदाने १३ क्रियार्थोपपदस्यच
कर्मणिस्थानिनः १४ तुमर्थाच्चभाववचनात् १५ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च १६ मन्यकर्मण्य
नादरेविभाषाप्राणिषु १७ कर्तृकरणयोस्तृतीया १८ सहयुक्तेऽप्रधाने १९ येनाङ्गविकारः २० इत्थंभूत
लक्षणे २१ संज्ञोऽन्यतरस्यांकर्मणि २२ हेतौ २३ अकर्तर्यृणेपञ्चमी २४ विभाषागुणेऽस्त्रियाम् २५ षष्ठी

२

विभाषा समीपे १६ स नपुंसकम् १७ अव्ययीभावश्च १८ तत्पुरुषोऽनञ्कर्मधारयः १९ संज्ञायां कन्थो-
शीनरेषु २० उपज्ञोपक्रमं तदाद्याचिख्यासायाम् २१ छाया बाहुल्ये २२ सभा राजामनुष्यपूर्वा २३
अशाला च २४ विभाषा सेनासुराच्छायाशालानिशानाम् २५ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २६
पूर्ववदश्ववडवौ २७ हेमन्तशिशिरावहोरात्रे च छन्दसि २८ रात्राह्नाहाः पुंसि २९ अपथं नपुं-
सकम् ३० अर्धर्चाः पुंसि च ३१ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ३२ एतदस्त्रतसोस्त्रतसौ चा-
नुदात्तौ ३३ द्वितीयाटौस्स्वेनः ३४ आर्धधातुके ३५ अदो जग्धिर्ल्यप्ति किति ३६ लुङ्सनोर्घसॢ ३७
घञपोश्च ३८ बहुलं छन्दसि ३९ लिट्यन्यतरस्याम् ४० वेञो वयिः ४१ हनो वध लिङि ४२ लुङि च ४३
आत्मनेपदेष्वन्यतरस्याम् ४४ इणो गा लुङि ४५ णौ गमिरबोधने ४६ सनि च ४७ इङश्च ४८ गाङ्
लिटि ४९ विभाषा लुङ्लृङोः ५० णौ च संश्चङोः ५१ अस्तेर्भूः ५२ ब्रुवो वचिः ५३ चक्षिङः ख्याञ् ५४

ग

ब्राह्मणे ६० प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने ६१ चतुर्थ्यर्थे बहुलं छन्दसि ६२ यजेश्च करणे ६३ कृत्वोऽर्थप्रयोगे काले
धिकरणे ६४ कर्तृकर्मणोः कृति ६५ उभयप्राप्तौ कर्मणि ६६ क्तस्य च वर्त्तमाने ६७ अधिकरणवाचिनश्च ६८ न
लोकाव्ययनिष्ठाखलर्थतृनाम् ६९ अकेनोर्भविष्यदाधमर्ण्ययोः ७० कृत्यानां कर्त्तरि वा ७१ तुल्यार्थैर
तुलोपमाभ्यां तृतीयान्यतरस्याम् ७२ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ७३ अनभिहित
इस्यपतस्त्रपुस्तकं वुधो स्तु योदत्त्या इति द्वितीयाध्यायस्य तृतीयः पादः॥ द्विगुरेकवचनम् १ द्वन्द्वश्च प्राणितू
र्यसेनांगानाम् २ अनुवादे चरणानाम् ३ अध्वर्युक्रतुरनपुंसकम् ४ अध्ययनतोऽविप्रकृष्टाख्यानाम् ५
जातिरप्राणिनाम् ६ विशिष्टलिंगो नदी देशोऽग्रामाः ७ क्षुद्रजंतवः ८ येषां च विरोधः शाश्वतिकः ९ शूद्रा
णामनिरवसितानाम् १० गवाश्वप्रभृतीनि च ११ विभाषावृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपू
र्वापराधरोत्तराणाम् १२ विप्रतिषिद्धं चानधिकरणवाचि १३ न दधिपयआदीनि १४ अधिकरणैतावत्त्वे च १८

ष्टार्थे [illegible] श्रुतस्य १ अनुदात्तो मुदित्तोध सर्विज्ञिज्ञ : समनूपमानव धदानश्रानम्यो सेर्द्धे।
[illegible] तोः कर्मसाः ७ समानकर्तृकादिच्छायां वा ८ सुपः ९ आत्मनः काच १० का।
[illegible] त्वा रे स्य कर्तुः क्यङ् सलोपश्च १२ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः १४
ले [illegible] भ्यः १५ लाक्षेपत्थ कष्टाय क्रमणे १६ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः १७।
व [illegible] ह फेनेः १८ शब्दवैरकलहाभ्रक १९ मेघेभ्यः करणे २० सुखादिभ्यः कर्तृवि
दनायां [illegible] नमोवरिवश्चित्रङः २२ क्यच् २३ पुत्रमा राज्ञा चीवराण्णिङ् २४ मुण्ड [illegible] वद
न [illegible] रूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् २६ धातो रेकाचो ह
लादेः क्रियासमभिहारे यङ् २७ नित्यं कौटिल्ये गतौ २८ लुपसदचरजप [illegible] दशभ्यो
लौ

वालिटि ५५ अजेर्व्यघञपोः ५६ वा यौ ५७ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ५८ पैलादिभ्यश्च ५९ इञः प्राचाम् ६० न तौल्वलि
भ्यः ६१ तद्राजस्य बहुषु तेनैवास्त्रियाम् ६२ यस्कादिभ्यो गोत्रे ६३ यञञोश्च ६४ अत्रिभृगुकुत्सवशिष्ठगोतमाङ्गि
रोभ्यश्च ६५ बह्वचः इञः प्राच्यभरतेषु ६६ न गोपवनादिभ्यः ६७ तिककितवादिभ्यो द्वन्द्वे ६८ उपकादिभ्योऽन्य
तरस्याम द्वन्द्वे ७० आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ७१ सुपो धातुप्रातिपदिकयोः ७२ अदिप्रभृतिभ्यः
शपः ७३ बहुलं छन्दसि ७४ यङोऽचि च ७५ जुहोत्यादिभ्यः श्लुः ७६ बहुलं छन्दसि ७७ गातिस्थाघुपाभूभ्यः
सिचः ७८ परस्मैपदेषु ७९ विभाषा घ्राधेट्शाछासः ८० तनादिभ्यस्तथासोः ८१ मन्त्रे घसह्वरणशवृदहाद्वृच्कृग
मिजनिभ्यो लेः ८२ आमः ८३ अव्ययादाप्सुपः ८४ नाव्ययीभावादतोऽम्त्वपञ्चम्याः ८५ तृतीयासप्तम्योर्बहुलम् ८६ लुटः
प्रथमस्य डारौरसः ८७ द्विग्वेकपञ्चोपक्रममवेमोन तौल्वलिभ्यः आमः पञ्च इति द्वितीयाध्यायस्य चतुर्थः पादः २

७७

म्रष्टाघ [illegible] कं [illegible] मंपुर्ण [illegible] चुरादिभ्योणिच् हेतुमतिच क
मी [illegible] ण्वाह् पा [illegible] पनिभ्यश्राय: ऋतेरीयङ् कमेर्णिङ् गयाया
[illegible] कैवा सनाद्यंता धातव: स्यतासील लुटो: सिब्बहुलंलेटि का
[illegible] ऽेलिटि इजादेश्चगुरुमतोनृच्छ: दयायासश्च उषविदजागृ
भ्यो: [illegible] भीह्रीभृहुवाम्लुवच्च कृञ्चानुप्रयुज्यतेलिटि विदांकुर्वन्त्वित्य
[illegible] मभूत [illegible] रम्यायोमकः पावयांक्रियाद्विदामक
[illegible] ण [illegible] ल्लुडि च्लेसिच् सकइगुपधादनिट:क्स: श्लि [illegible] श्च्रालिङि ।
नटश्च: णिश्रिदुसुभ्य: कर्तरिचङ् विभाषाधेट्श्व्यो: गुपेश्छन्दसि [illegible] नमतिध

मृत्यप॥दस्य आयुदात्तश्च अनुदात्तौसुप्पितौ गुप्तिज्किद्भ्यः सन् मान्बध्दान्शान्भ्योदी
...मस्य धातोःकर्मणः समानकर्तृकाद्दिच्छायांवा सुप्आत्मनःक्यच् का
म्यच् ...द्याचारे कर्तुःक्यङ्सलोपश्च भृशादिभ्योभुव्यच्वेर्लोपश्चहलः॥
...शब्दवैरकलह... कष्टायक्रमणे कर्मणोरोमन्यतपोभ्यांवर्तिचरोः॥
...उद्धमने पुच्छभाण्डचीवराण्णिङ् सुखादिभ्यः
...नाम मोवरिवश्चित्रङ्क्यच् पुच्छभाण्डचीवराण्णिङ् मुण्डमिश्रश्लक्ष्ण
...त्रहलवलवसतनतूस्तेभ्योणिच् धातोरेकाचोहलादेः क्रियासमभिहा
...णिधिकि... लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् स्या

[illegible] ताः स्मः पानसौ स्यादिस्थयजपिव्यात्ययेवकुलम् लिङ्गाशिष्यङ्॥
[illegible] तुल्यक्रियः तपस्तपःकर्मकस्यैव नडुहस्नुनमांयक्तिस्तौ कुषि
[illegible] पूर्वान्तरहेपदं च धातोः तत्रोपपदं सप्तमीस्थम् कृदतिङ् वास
[illegible] कत्वा पाङ्गु सावुलः तव्यत्तव्यानीयरः अचोयत् पोरदुपधात्॥
[illegible] मदचरयमश्चानुपसर्गे अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधे
[illegible] म् अर्यः स्वामिवैश्ययोः उपसर्या काल्या प्रजने अजर्यं सङ्गतं
[illegible] भुवोभावे हनस्तच् एतिस्तुशास्वृदृजुषः क्यप् ऋदुपधाच्चाकॢपि
चृतः ईयाकनः मजो संज्ञायाम् मृजेर्विभाषा राजसूय [illegible]

ग्रा॰२

नमद्वेत्नयत्सर्दितिभ्यः आर्द्धातिवत्क्लिव्याकिर्म्यौड्ः लिपिसिचिहृश्च [illegible]नेषवृश्चन्यत
मस्याम [illegible]तः पंसेवृ[illegible] नद्विरामन्यर्तिभ्यश्च डुरिते[illegible] त्तस्तुम
डु[illegible]ष्ठि[illegible] विवितिपदः दीपयनवुध्यूरि
ताविद[illegible]यतसत्याम् स्रघ्वः कमककर्तरि [illegible]श्च नरुधः तपोनुतापे च॥
चि[illegible]: कर्मेधातवोरकु कर्तरि श्यपू दिवादिभ्यः श्यन् वाभ्रा
भ्रमु[illegible]त्रसितुटिलषः यसोनुपसर्गात् स्यसश्च स्वादिभ्यःश्नुः श्रुवः
प्रव[illegible] तनकर्तीतद्वः तुदादिभ्यः शः रुधादिभ्यः श्नम् त
न[illegible]भ्यः श्ना सामनुत्तम्नतुस्क म्नुस्कुम्भु

ष्टाध्यायीवि[illegible]का: आतश्चोपसर्गे पाघ्राध्माधेट्दृशः अनुपसर्गाल्लिम्पविन्दधारिपारि
।पी॥ वेद्युदेजिचेतिसाहिभ्यश्च ददातिदधात्योर्विभाषा ज्वलितिकसन्तेभ्यो णः पुष्टाध्या।
[illegible]श्यातीणवसाव लिहश्लिषश्वसश्च दुन्योरनुपसर्गे विभाषाग्रहः गेहेकः॥
शिल्पिनिष्वुन् गस्थकन् ण्युट् च हश्चव्रीहिकालयोः प्रुसृल्वः समभिहारे वुन् आ
शिषिच प्रत्ययोमुराडविदादीपञ्चादिभ्योव घघुग्पश्पा घ्रधादश्च १५० इत्यष्टाध्या
य्यां तृतीयस्याध्यायस्य प्रथमः पादः १॥ कर्मण्यण् ह्वावामश्च आतोनुपसर्गे कः॥ गे
सुपिस्थः तुन्दशोकयोः परिमृजापनुदोः प्रेदाज्ञः समिख्यः गापोष्टक् हरते
रनुद्यमनेरच् वयसिच आङिताच्छील्ये अर्हः स्तम्बकर्णयोरमिजपोः शा

राम

स्यक पाकस्य पचाव्यष्ष्पा मित्रो धेनदे सुष्मा सि धौ नद्धत्रे विपूर[illegible]त्यामु
[illegible] निषु प्रत्य पिश्यां प्र[illegible] हृत्नसि पदा द्वे रि जाह्य पद्मे सुव विभाबाक
[illegible] रिते समाबासदं सुतरूपाम् ऊंदसि निष्ट्का दे व हूय ग्रीयो
[illegible] या धर्म रत्न स्वान्य देव यज्या मह्द्ध प्रतें बोध्य बृहस्व वो घभाम्य सत्वो
[illegible] जानि म[illegible]सो वृधि ऊमवस्यके शाम्ल पुवविमाद्वि लपित्रप्त्वि
[illegible] नोति ने पुरायो सङ्गतो याप्पमान्वायनि कान्वधा प्यामानकृवि।
[illegible] पीपु मातोदा तृपाप्य स्पहाय्यो मन्ने परिचाप्यो पचाध्य स्मेहाः॥
[illegible] रीक सबुलत्त चौं नन्द्गिराहिप चाँ ष्योत्स्तुति न्यचः इमुवधता
द

अनेयजः निद्वेषंछन्दसि आत्मोमनिन् कनिडुनिपञ्च अन्येभ्योपदृश्यन्ते किप् स्यः कच सुप्यजातौ णिनिस्ताच्छील्ये कर्तर्यु
पमाने व्रते २१ बहुलमाभीक्ष्ण्ये मनः आत्ममानेखश्च भूते करणेयजः कर्मणिहनः ब्रह्मभ्रूणवृत्रेषु क्विप् बहुलंछन्दसि सुकर्मपापमंत्र
पुण्येषुकृञः सोमेसुञः अग्नौचेः कर्मण्यग्न्याख्यायाम् कर्मणीनिर्विक्रियः दृशेःक्वनिप् राजनियुधिकृञः सहेच सप्तम्यांजनेर्डः पंचम्यामजातौ उपस
र्गेचसंज्ञायां अनौकर्मणि ५ २२ अन्येष्वपिदृश्यते निष्ठा सुयजोर्ङ्वनिप् जीर्यतेरतृन् छन्दसिलिट् लिटःकानज्वा क्वसुश्च भाषायांस
दवसश्रुवः उपेयिवाननाश्वाननूचानश्च लुङ् अनद्यतनेलङ् अभिज्ञावचनेलृट् नयदि विभाषासाकांक्षे परोक्षेलिट् हशश्वतोर्
लङ्च प्रश्नेचासन्नकाले लट्स्मे अपरोक्षेच ननौपृष्टप्रतिवचने ६ १२ नन्वोर्विभाषा पुरिलुङ्चास्मे वर्तमानेलट् लटःशतृशान
चावप्रथमासमानाधिकरणे संबोधनेच लक्षणहेत्वोः क्रियायाः तौसत् पूङ्यजोःशानन् ताच्छील्यवयोवचनशक्तिषुचानश् इङ्धार्योश्श
त्रकृच्छ्रिणि द्विषोमित्रे सुञोयज्ञसंयोगे अर्हः प्रशंसायाम् आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु तृन् अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतो
न्मदरुच्यपत्रपवृतुवृधुसहचरइष्णुच् णेश्छन्दसि भुवश्च ग्लाजिस्थश्चग्स्नुः त्रसिगृधिधृषिक्षिपेःक्नुः ७ २४ शमित्यष्टाभ्योघिनुण् संपृचा म
नुरुधाङ्यमयसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापमु
षाभ्याहनश्च ॥ ८॥

भिषानाः स्वस्त्या अधिकरणे गेहे चेरहः मितासेनास्येषुच पुरोग्रतोऽग्रेषुसर्त्ते पूर्वे कर्त्तरि हृञोहेतुताच्छील्यानुलोम्येषु १८ दिवाविभानिशा
प्रभाभास्कर्रान्तानंतादि बहुनांदीकिंलिपिलिविबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजंघाबाहूहर्यतद्धनुररुष्षु ... मतो नरादः श्लोककलह
गाथावैरचाटुसूत्रमंत्रपदेषु लवणरूतोरिव हरतेरनिनाथयोःपशौ फलेग्रहिरात्मंभरिश्च छन्दसिवनसनरक्षिमथा राजेः स्वरा नासिकात्त
नयोर्ध्मः ... स्तिनस्तेनचमिधरुपेरत्तुदः अरुद्वर्षलतललाटयोर्दृशितपोः उग्रंपश्येरंमदपाणिंधमाश्च प्रियवशेवदः ... द्विषत्परयो
स्तापेः वाचियमोव्रते ... सर्वकूलाभ्रकरीषेषुकषः मेघर्तिभयेषुकृञः क्षेमप्रियमद्रेणच आशिनेभुवः करणभावयोः
... तायांभरतृवृधारिसहितपदमिः गमश्च अन्तात्यन्ताध्वदूरपारसर्वानन्तेषुडः आशिषिहनः अपेक्लेशतमसोः कुमारशीर्षयोर्णिनिः॥
लक्षणे ... अमनुष्यकर्तृकेच शक्तौहस्तिकपाटयोः पाणिघाताडघौशिल्पिनि आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्वौकृञः
करणे ... स्पृशोनुदके क्विन् ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचाच त्यदादिषुदृशोनालोचने
कञ्च ... हिंसाद्रुहमुहस्नुहस्निहयुजविदभिदछिदजिनीराजामुपसर्गेपिक्विप् भजोण्विः छन्दसिसहः वहश्च कव्यपुरीषपुरीष्येषुञ्
युट् हव्ये ... जनसनखनक्रमगमोविट् अदोनन्ने क्रव्येच दुहःकप्घश्च मंत्रेश्वेतवहोक्थशस्पुरोडाशोण्विन्॥

ध • धा

२५ गम्यादयः यावत्पुरानिपातयोर्लट् विभा कदाकर्ह्योः किंवृत्ते लिप्सायां लिप्स्यमानसिद्धौ च लोडर्थलक्षणे च लिङ् चोर्ध्वमौहूर्त्ति
के. तुमुन् ण्वुलौ क्रियायांक्रियार्थायां भाववचनाश्च अण् कर्मणि च लृट् शेषे च लृटः सद्वा अनद्यतने लुट्॥
पदरुजविशस्पृशो घञ् सृ स्थिरे भावे अकर्त्तरि च कारके संज्ञायाम् परिमाणाख्यायां सर्वेभ्यः १ ९ इङश्च उपसर्गे रुवः समि युद्रुदुवः श्रिणीभु
वोऽनुपसर्गे वौ क्षुश्रुवः अवोदोर्नियः प्रे द्रुस्तुस्रुवः निरभ्योः पूल्वोः उन्न्योर्ग्रः कृ धान्ये यज्ञे समि स्तुवः प्रे स्त्रोऽयज्ञे प्रथने वावशब्दे छं
दोनाम्नि च उदि ग्रहः समि मुष्टौ परिन्योर्नीणोर्द्यूताभ्रेषयोः परावनुपात्यय इणः व्युपयोः शेतेः पर्याये हस्तादाने चेरस्तेये २ १८
निवासचितिशरीरोपसमाधानेष्वादेश्च कः संघे चानौत्तराधर्ये कर्मव्यतिहारे णच् स्त्रियाम् अभिविधौ भाव इनुण् आक्रोशेऽवन्योर्ग्रहः प्रे लि
प्सायाम् परौ यज्ञे नौ वृ धान्ये उदि श्रयति यौति पूद्रुवः विभाषाङि रुप्लुवोः अवे ग्रहो वर्षप्रतिबंधे प्रे वणिजाम् रश्मौ च वृणोतेराच्छादने॥
परौ भुवोऽवज्ञाने ऋदोरप् ग्रहवृदृनिश्चिगमश्च उपसर्गेऽदः नौ ण च ३ १९ व्यधजपोरनुपसर्गे स्वनहसोर्वा यमः समुपनिविषु च॥
नौ गदनदपठस्वनः क्वणो वीणायां च नित्यं पणः परिमाणे मदोऽनुपसर्गे प्रमदसंमदौ हर्षे समुदोरजः पशुषु अक्षेषु ग्लहः प्रजने सर्त्तेः ह्वः
संप्रसारणं च न्यभ्युपविषु आङि युद्धे निपानमाहावः भावेऽनुपसर्गस्य हनश्च वधः मूर्त्तौ घनः अंतर्घनो देशे अगारैकदेशे प्रघाणः॥

राम
१४

5

चैकषलषकत्यखेभः ग्रेष्चलषुः षेलपुस्तनथ्यवदसः निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयोवुञ् देविकुशो
श्चोपसर्गे चलनशब्दार्थादकर्मकाद्युच् अनुदात्तेतश्च हलादेः जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः क्रुधमंडार्थेभ्यश्च नयः स्तृपी
डदीपदीक्ष्म लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् जल्पभिक्षकुट्टलुंटवृङः षाकन् प्रजोरिनिः जिदृक्षिविश्र्यण्वमाव्यथाभ्य
मपरिभूप्रसवरभ्यश्च स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् दाधेट्सिशदसदो रुः स्पघसदस्मरचु ८ १५ भंजभासमिदो घुरच् विदि
भिदिछिदेः कुरच् इणनशजिसर्तिभ्यः क्वरप् गत्वरश्च जागुरूकः यजजपदशां यङः नमिकंपिस्म्यजसकमहिंसदीपो रः सनाशंस
भिक्ष उः विंदुरिच्छुः आदृगमहनजनः किंकिनौ लिट् च स्वपितृषोर्नजिङ् शृवंद्योरारुः भियः क्रुक्लुकनौ स्थेश
भासपिसकसो वरच् यश्च यङः भ्रजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् अन्येभ्योपि दृश्यन्ते भुवः संज्ञान्तरयोः । विप्रसंभ्यो ड्वसंज्ञा
याम् ८ १६ धः कर्मणि ष्ट्रन् दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे हलसूकरयोः पुवः अर्तिलूधूसूखनस
हचर इत्रः पुवः संज्ञायाम् कर्तरि चर्षिदेवतयोः जीतः क्तः मतिबुद्धिपूजार्थेभ्यश्च १० कर्मणि दिकाप्तः सन्तु वहुलमन्येष्वपि निन्योः
मी
शमिति भजनासधः कर्मणि ष्टो ।१९। इति तती याध्यायस्य द्वितीयः पादः ॥ उणादयो वहुलम् भूतेपि दृश्यंते भविष्यति

गर्हायांलडपिजात्वोः विभाषाकथमिलिङ् किंवृत्तेलिङ्लृटौ अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि किंकिलास्त्यर्थेषुलृट् जातुयदोर्लि
ङ् यच्चयत्रयोः गर्हायांच चित्रीकरणेच शेषेलृडयदौ उताप्योः समर्थयोर्लिङ् कामप्रवेदनेऽकच्चिति संभवनेलमितिचेत्सिद्धाप्र
योगे विभाषाधातौसंभावनवचनेयदि हेतुमतोलिङ् इच्छार्थेषुलिङ्लोटौ समानकर्तृकेषुतुमुन् लिङ्च २ इच्छार्थेभ्योविभा
षावर्तमाने ८४ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषुलिङ् लोट् प्रैषातिसर्गप्राप्तकालेषुकृत्याश्च लिङ्चोर्ध्वमौ
हूर्तिके स्मेलोट् अधीष्टेच कालसमयवेलासुतुमुन् लिङ्यदि अर्हेकृत्यतृचश्च आवश्यकाधमर्ण्ययोर्णिनिः कृत्या
श्च शकिलिङ्च आशिषिलिङ्लोटौ क्तिच्क्तौचसंज्ञायां माङिलुङ् स्मोत्तरेलङ्च ९ उणादयो(ऽ)बहुलं नितान्तव्याध
योरवधानयोः श्याद्व्यधास्रुसंस्वतीणवसावहृलिहश्लिषश्वसश्च वातातयोर्विविधिषोडश॥ इतितृतीयाध्यायस्यतृतीयःपादः॥ धातुसंबंधेप्रत्ययाः क्रियास
मभिहारेलोट् लोटोहिस्वौवाचतध्वमोः समुच्चयेन्यतरस्यां यथाविध्यनुप्रयोगः पूर्वस्मिन् समुच्चयेसामान्यवचनस्य॥
छन्दसिलुङ्लङ्लिटः लिङर्थेलेट् उपसंवादाशंकयोश्च तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः प्र
यैरोहिष्यैअव्यथिष्यै दृशेविख्येच शकिणमुल्कमुलौ ईश्वरेतोसुन्कसुनौ कृत्यार्थेतवैकेन्केन्यत्वनः॥ अवचक्षेच॥

रामः
२८

मयाणश्च उद्घनोत्याधनम् ६ २० अपघनोंगं करणयोविद्रुषु स्तंबेकच परीघः उपघ्न आश्रये संघोद्घौगणप्रशंसयोः निघोनिमितं प्रितः १
क्रिः ड्वितोथुच् यजयाचयतविच्छप्रछरक्षोनङ् स्वपोनन् उपसर्गे घोः किः कर्मण्यधिकरणेच स्त्रियांक्तिन् स्थागापापचोभावे मं
त्रेवृषेषपचमनविदः भूवीरा उदात्तः ऊति यूति जूति साति हेति कीर्तयश्च व्रजयजोर्भावेक्यप् संज्ञायांसमजनिषदनिपतमनविदषु
ञ् शीङ् भृञिणः कृञः शश्च ५ २१ इच्छा अप्रत्ययात् गुरोश्च हलः षिद्भिदादिभ्योङ् चिंतिपूजिकथिकुंबिचर्चश्च आतश्चोपसर्गे॥
ण्यासश्रंथोयुच् रोगाख्यायां ण्वुल्बहुलं संज्ञायां विभाषाख्यानपरिप्रश्नयोरिञ्च पर्यायार्हणोत्पत्तिषु ण्वुच् आक्रोशेन
ञ्यनिः क्तल्युटोर्बहुलं नपुंसके भावेक्तः ल्युट्च कर्मणिच येन संस्पर्शात्कर्तुः शरीरसुखं करणाधिकरणयोश्च पुंसि संज्ञायांघः
प्रायेण गोचरसंचरवहव्रजव्यजापणनिगमाश्च अवेतॄस्त्रोर्घञ् ६ २२ हलश्च अध्यायन्यायोद्यावसंहाराधारावायाश्च उदंकोनुदके जालमानायः १
खनोघच ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल् कर्तृकर्मणोश्च भूकृञोः आतोयुच् छन्दसि गत्यर्थेभ्यः अन्येभ्योपिदृश्यते वर्तमानसा
मीप्ये वर्तमानवद्वा आशंसायां भूतवच्च क्षिप्रवचने लृट् आशंसावचने लिङ् नानद्यतनवत्क्रियाप्रबंधसामीप्ययोः भविष्यतिम
र्यादावचनेवरस्मिन् कालविभागे चानहोरात्राणाम् परस्मिन्विभाषा लिङ्निमित्ते लृङ् क्रियायातिपत्तौ भूतेच ० २३ वा नाम्न्या॥
वे।

भावलक्षणेस्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् सृपितृदोःकसुन् अलंखल्वोःप्रतिषेधयोः प्राचांङ्क्त्वा उदी।
चांमाङोव्यतीहारे परावरयोगेच स्तस्थप २६ तस्थस्थमिपांतांतंतामः लिङःसीयुट् यासुट्परस्मैपदेषूदात्तोङिच्च कि-
दाशिषि झस्यरन् इटोत् सुट्तिथोः झेर्जुस् सिजभ्यस्तविदिभ्यश्च आतः लङःशाकटायनस्यैव द्विषश्च तिङ्शित्सार्व-
धातुकं आर्द्धधातुकंशेषः लिड्वमिपांसप्रदश॥ सूत्रसंख्या ६३। इतिपाणिनीयसूत्रपाठेतृतीयोध्यायः॥

राम
१७

पूर्व्वत्रासिद्धम् १ नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति २ न मु ने ३ उदात्तस्वरितयोर्यणः स्वरितोनुदा
त्तस्य ४ एकादेश उदात्तेनोदात्तः ५ स्वरितो वानुदात्ते पदादौ ६ नलोपः प्रातिपदिकान्तस्य ७ न ङिसं
बुद्ध्योः ८ मादुपधायाश्च मतोर्वोयवादिभ्यः ९ झयः १० संज्ञायाम् ११ आसन्दीवदष्ठीवच्चक्रीवत्कक्षीव
द्रुमण्वच्चर्मण्वती १२ उदन्वानुदधौ च १३ राजन्वान्सौराज्ये १४ छन्दसीरः १५ अनो नुट् १६ नाद्घस्य १७ कृ
पो रो लः १८ उपसर्गस्यायतौ १९ ग्रसो यङि २० अचि विभाषा २१ परेश्च घाङ्कयोः २२ संयोगान्तस्य
लोपः २३ रात्सस्य २४ धि च २५ झलो झलि २६ ह्रस्वादङ्गात् २७ इट ईटि २८ स्कोः संयोगाद्योरन्ते च ॥ २९
चोः कुः ३० हो ढः ३१ दादेर्धातोर्घः ३२ वा द्रुहमुहष्णुहष्णिहाम् ३३ नहो धः ३४ आहस्थः ३५ व्रश्च

१

त्रि॰ दी॰ भ्रस्जसृजमृजयजराजभ्राजछशां षः [३६] एकाचो बशो भष् झषन्तस्य स्ध्वोः [३७] दधस्तथोश्च [३८] झलां
जशोऽन्ते झषस्तथोर्धोऽधः षढोः कः सि रदाभ्यां निष्ठातो नः पूर्वस्य च दः संयोगादेरातो धातो
र्यण्वतः ल्वादिभ्यः ओदितश्च क्षियो दीर्घात् श्योऽस्पर्शे अञ्चोऽनपादाने दिवोऽविजिगीषा
याम् निर्वाणोऽवाते शुषः कः पचो वः क्षायो मः प्रस्त्योऽन्यतरस्याम् अनुपसर्गात्
फुल्लक्षीबकृशोल्लाघाः नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् न ध्याख्यापॄमूर्छिमदा
म् वित्तो भोगप्रत्यययोः भित्तं शकलम् ऋणमाधमर्ण्ये नसत्तनिषत्तानुत्तप्रतूर्त
सूर्तगूर्तानि छन्दसि क्विन्प्रत्ययस्य कुः नशेर्वा मो नो धातोः म्वोश्च ससजुषो रुः
अवयाः श्वेतवाः पुरोडाश्च अहन् रोऽसुपि अम्नरूधरवरित्युभयथा छन्दसि भु

राम

२

भुवश्च महाव्याहृतेः वसुस्रंसुध्वंस्वनडुहांदः तिप्यनस्तेः सिपिधातोरुर्वा दश्च वीरुपधाया
दीर्घ इकः हलि च उपधायां च नभकुर्छुराम् अदसोसेर्दादुदोमः एतईद्बहुवचने ॥
वाक्यस्य टेः प्लुत उदात्तः प्रत्यभिवादेऽशूद्रे दूराद्धूते च ॥ हैहेप्रयोगे हैहयोः गुरोरनृ
तोनन्त्यस्याप्येकैकस्य प्राचाम् ओमभ्यादाने येयज्ञकर्मणि प्रणवष्टेः याज्यान्तः
ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः अग्नीत्प्रेषणे परस्य च विभाषा पृष्टप्रतिवचने हेः नि
गृह्यानुयोगे च आम्रेडितं भर्त्सने अङ्गयुक्तं तिङाकाङ्क्षम् विचार्यमाणानाम् ॥
पूर्वं तु भाषायाम् प्रतिश्रवणे च अनुदात्तं प्रश्नान्ताभिपूजितयोः चिदिति चोपमानार्थे प्रयु
ज्यमाने उपरिस्विदासीदिति च स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु क्षि
ता

२

त्रि॰ दी याश्रीः प्रैषबुतिङाकाङ्क्षम् अनन्त्यस्यापिप्रश्नाख्यानयोः प्लुतावैच इदुतौ एचोप्रगृह्य
स्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ तयोर्य्वावचि संहितायाम् पूर्वत्राचिद्धटोर्नसन्तेत्त
ल्लिखिदितिवाष्टौ १०८ इत्यष्टाध्याय्यामष्टमस्याध्यायस्य द्वितीयः पादः २ मतुवसो
रुः सम्बुद्धौछन्दसि आत्रानुनासिकः पूर्वस्यतुवा आतोटिनित्यम् अनुनासिकात्परोऽनु
स्वारः समःसुटि पुनःखय्यम्परे नश्छव्यप्रशान् उभयथर्क्षु दीर्घादटि
श्रीगणेश समानपदे नन्ये स्वतवान्पायौ कानाम्रेडिते ढोढेलोपः रोरि खरवसा
नयोर्विसर्जनीयः रोसुपि भोभगोअघोअपूर्वस्ययोऽशि व्योर्लघुप्रयत्नतरः शा
कटायनस्य लोपः शाकल्यस्य ओतोगार्ग्यस्य उति चपदे हलिसर्वेषाम्

राम २

३

त्रि॰ टी इण्कोः नुम्विसर्जनीयशर्व्यवायेपि आदेशप्रत्यययोः शासिवसिघसीनांच स्तौति
ण्योरेव षण्यभ्यासात्सः स्विदिस्वदिसहीनांच प्राक्सितादड्व्यवायेपि स्थादिष्व
भ्यासेन चाभ्यासस्य उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसि
च सञ्जस्वञ्जाम् सदिरप्रतेः स्तम्भेः अवाच्चालम्बनाविदूर्ययोः वेश्च स्वनो
भोजने परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् सिवादीनांवाड्
व्यवायेपि अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु वेः स्कन्देरनिष्ठायाम् परेश्च॥
परिस्कन्दः प्राच्यभरतेषु स्फुरतिस्फुलत्योर्निर्निविभ्यः वेः स्कभ्नातेर्नित्यम् इणः
षीध्वंलुङ्लिटांधोङ्गात् विभाषेटः समासेङ्गुलेः सङ्गः भीरोः स्थानम् अग्नेः स्तुत्

३

मोऽनुस्वारः नश्चापदान्तस्य झलि मोराजिसमः क्वौ हेमपरे वा नपरे नः ङ्णोः कुक्टुक् शरि ॥
ङःसिधुट् नश्च शितुक् ङमोह्रस्वादचिङमुण्नित्यम् मयउञोवोवः विसर्ज
[illegible]यस्य सः शर्परे विसर्जनीयः वा शरि कुप्वोः ≍क≍पौ च सोऽपदादौ इणः षः ॥
[illegible]नमस्पुरसोर्गत्योः इदुदुपधस्य चाप्रत्ययस्य तिरसोऽन्यतरस्याम् द्विस्त्रिश्चतुरिति
कृत्वोऽर्थे इसुसोः सामर्थ्ये नित्यं समासेऽनुत्तरपदस्थस्य अतः कृकमिकंसकुम्भपा
त्रकुशाकर्णीष्वनव्ययस्य अधःशिरसीपदे कस्कादिषु च छन्दसि वाप्राम्रेडित
यो[illegible] कःकरत्करतिकृधिकृतेष्वनदितेः पञ्चम्याः परावध्यर्थे पातौ च बहुलम् षष्ठ्याः
[illegible]पुत्रपृष्ठपारपदपयस्पोषेषु इडाया वा अपदान्तस्य मूर्धन्यः सहेःसाडःसः

मातापितृभ्यां स्वसा मातुः पितुर्भ्यामन्यतरस्याम्

स्तस्तोमसोमः ज्योतिरायुषः स्तोमः मातापितृभ्यां स्वसा मातुः पितुर्भ्यामन्यतरस्याम् अभिनिसस्तनः संज्ञायाम् उपसर्गप्रादुर्भ्यामस्तिर्यच्परः सुविनिर्दुर्भ्यः

सुपिसूतिसमाः निनदीभ्यां स्नातेः कौशले सूत्रं प्रतिस्नातम् कपिष्ठलो गोत्रे॥

विकुशमिपरिभ्यः स्थलम् अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जि

...ह्रिदिव्यग्निभ्यः स्थः सुषामादिषु च इति संज्ञायामगात् नक्षत्राद्वा॥

...तिर्यैतिष्ठिते निसस्तापतावनासेवने युष्मत्तत्ततक्षुष्वन्तःपादम् यजुष्ये

त्रि·ए केषाम् स्तुतस्तोमयोश्छन्दसि पूर्वपदात् सुत्रः सनोतेरनः सहेः पृत्तेनर्त्ताभ्यां
च नरपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् सात्पदाद्योः सिचोयङि से
गतौ प्रतिस्तब्धनिस्तब्धौ च सोढः॥ स्तम्भुसिवुसहांचङि सुनोतेःस्यसनोः॥
सदिस्वञ्जोः परस्यलिटि निव्यभिभ्योड्व्यवायेवाछन्दसि सस्तुवसो स्तुजिच्छेड्डुपध्वस्यस्तो
लोमीशो हस्त्व नदवेकान विंशति ११९ इत्यष्टाध्याय्यामष्टमस्याध्यायस्य तृ
तीयः पादः ३ रषाभ्यां नो णः समानपदे॥ अट्कुप्वाङ्नुम्व्यवायेपि पूर्वपदात्संज्ञा
यामगः वनंपुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः प्रनिरन्तः शरेक्षु
प्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योः संज्ञायामपि॥ विभाषौषधिवनस्पतिभ्यः॥ रम
७

ग्रहेरुन्नात् वाहनमाहितात्, पानेदेशे वाभाकरस्तायोः प्रतिपदिकान्तनुमि तिषु
च एकाजुत्तरपदेणः कुमतिच उपसर्गादसमासेपिणोपदेशस्य हिनुमीना
लुङ् नेर्गदपतपद वुमास्यति हन्तियातिवातिद्रातिप्सातिपतिवहतिशाम्यति
दनिषुच प्रोबेविभाषाकखादावषान्तउपदेशे स्वनितेः ग्नन्तः उभौ ॥
हन्तेरत्पूर्वस्य वमोर्वा स्वन्तदेशे अयनेच कृत्यचः ॥
उपसर्गाद्बहुलम् कृत्यचः णेर्विभाषा हलश्चेजुपधात् इजादेःसनुमः वानिंसनिक्षनि
नन्दः नभाभूपूकमिगमिप्यायीवेपाम् षात्पदान्तात् नशेषान्तस्य पदव्यवायेपि ॥
विभ्नादिवुचे नुनास्युः कुनाकुः नपदान्ताहोरनाम् तोषि पूतात् पूर्वानुना

त्रि॰ द्वौ॰ सिकोऽनुनासिकोवा अचोरहाभ्यांद्वे अनचिच नादिन्याक्रोशेपुत्रस्य शरोऽचि त्रिप्रभृ
तिषुशाकटायनस्य सर्वत्रशाकल्यस्य दीर्घादाचार्याणाम् झलांजश्झशि अभ्यासेच
चर्च खरिच वावसाने अणोऽप्रगृह्यस्यानुनासिकः अनुस्वारस्ययथिपरसवर्णः॥
वापदान्तस्य तोर्लि उदःस्थास्तम्भोःपूर्वस्य झयोहोऽन्यतरस्याम् शश्छोऽटि हलोयमांय
मिलोपः झरोझरिसवर्णे उदात्तादनुदात्तस्यस्वरितः नोदात्तस्वरितोदयमगार्ग्यका
श्यपगालवानाम् अअइति स्थाम्पामुत्तोष्टुनोदोष्टौ ६८ इतिपाणिनीयसूत्रपा
ठेअष्टाध्याय्यामष्टमस्याध्यायस्यचतुर्थःपादः ४ ३६९ इत्यष्टमोध्यायः समाप्तः ८

राम